Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

यहाँ से काटिए

No. of Questions – 30

No. of Printed Pages – 7

SS–12–Sanskrit Sah.(Supp.)

# उच्च माध्यमिक पूरक परीक्षा, 2018

## SENIOR SECONDARY SUPPLEMENTARY EXAMINATION, 2018

## संस्कृत साहित्यम्

**समय** : 3¼ **(सपाद होरात्रयम्)**

**पूर्णाङ्क** : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) **परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः ।**

2) **सर्वे प्रश्नाः अनिवार्याः ।**

3) **प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।**

4) **प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।**

यहाँ से काटिए

1) अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

अलं महीपाल तव श्रमेण,

प्रयुक्तमप्यस्त्रि मितोवृथा स्यात् ।

न पादपोन्मूलन शक्तिरंहः

शिलोच्चये मूर्च्छति मारूतस्य ।।

क) अत्र प्रयुक्तमपि किं वृथा स्यात्? [1]

ख) 'पर्याप्तम्' इति पदस्य पर्यायपदं पद्यांशात् लिखत । [1]

ग) 'अलं महीपाल तवश्रमेण' इति कः कस्मै कथयति? [2]

2) अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

संङ्घटनद्वारा किं न भवति? कि मस्ति दुष्करं कर्म यत् सङ्घटनशक्त्या सुकरं न जायते? अस्माकं पूर्वजानां सङ्घटन–सम्बन्धिन्यो गौरव–गाथाः सम्पूर्ण विश्वस्य पुनरावृत्ति पृष्ठेषु सुवर्णाक्षरैरंकिताः सन्ति । पुनः किमद्य कारणं, यद् वयं स्वकीयां महतीं शक्तिं विस्मृतिगर्ते निपात्य अकर्मण्या भूत्वा तिष्ठामो निजं दिष्टं च दुष्टं घोषयन्तः शपामहे?

क) वयं किं विस्मृतिगर्ते निपात्य अकर्मण्या भूत्वा तिष्ठामः? [1]

ख) सङ्घटनशक्त्या किं सुकरं जायते? [1]

ग) ''यद् वयं स्वकीयां महतीं ............ शपामहे'' इत्यत्र 'शपामहे' इति क्रिया पदस्य कर्तृपदं लिखत । [2]

3) अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

तमसा–उचितमेव दाक्षिण्यं स्नेहस्या सञ्जीवनोपायस्तु मौलिक एव रामभद्रस्याद्य संनिहितः ।

मुरला – कथमिव?

तमसा – तत्सर्वं श्रूयताम्–पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य निवृत्ते सति लक्ष्मणे सीता देवी प्राप्त प्रसववेदनमति दुःखसंवेगादात्मानं गङ्गाप्रवाहे निक्षिप्तवती । तदैव तत्र दारकद्वयं च प्रसूता ।

क) आत्मानं गङ्गाप्रवाहे का निक्षिप्तवती? [1]

ख) 'आगते' इति पदस्य विलोमः नाट्यांशात् लिखत । [1]

ग) सीता दारकद्वयं कदा प्रसूता? [2]

4) रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरूत –

क) यक्ष: रामगिरि–आश्रमेषु निवसति स्म । [1]

ख) बिदूषक: मम मित्रम् अस्ति । [1]

ग) पाण्डवा : पज्च भ्रातर : आसन् । [1]

5) निम्नलिखितयो: वाक्ययो: भावार्थं हिन्द्यां संस्कृते वा लिखत–

क) पैशुन्यं परदूषणम् । [2]

*ख)* भाग्यक्रमेण हि धनानि भवन्ति यान्ति । [2]

6) अधोलिखितस्य श्लोकस्य अन्वयसहितं सरलम् अर्थं हिन्द्यां संस्कृते वा लिखत – [3]

उत्तमं प्रणिपातेन, शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन, समशक्तिं पराक्रमै: ।।

7) निम्नलिखितयो: शब्दयो: हिन्दीभाषायाम् आङ्ग्लभाषायां वा अर्थं लिखत –

क) कृष्णवर्त्मा [1]

ख) स्तन्यम् [1]

8) ''बुद्धिमान् मनुष्य: स्वकार्यं नीत्या साधयति'' अत्र विशेषणपदं किम्? [1]

9) ''राजवचनमनुगच्छति जनो भयात्'' इत्यत्र 'अनुगच्छति' क्रियाया:कर्ता क:? [1]

10) ''वयस्य मा मैवम्'' रेखांकितपदस्य पर्यायपदं लिखत । [1]

11) ''विचारमूढ: प्रतिमासि मे त्वम्'' इत्यत्र 'त्वं' सर्वनामस्थाने संज्ञा पदस्य प्रयोगं कुरूत । [1]

12) ''भारतीयशो भृशं ..........'' इत्यत्र रेखांकितपदस्य विलोमपदं लिखत । [1]

13) ''भो भागिनेय । देहि मे प्राणदक्षिणाम्'' इति क: कं प्रति कथयति? [1]

14) यज्ञे कति ऋत्विज: भवन्ति? नामोल्लेखपूर्वकं वर्णनं कुरूत । [3]

15) 'मुद्राराक्षसम्' इत्यस्य नाटकस्य रचनाकार:क:? इदं नाटकं कतिअङ्के षु विभक्तम् अस्ति? [2]

16) हर्षचरितस्य संक्षिप्तं परिचयं लिखत। [2]

17) निम्नलिखित–प्रश्नानां संक्षिप्तम् उत्तरं लिखत–

क) सोवियतभूमिनेहरूपुरस्कारेण क: महाकवि: सम्मानित:? [1]

ख) 'जरासन्धवधम्' इति महाकाव्यस्य लेखक : क:? [1]

ग) श्रीनिवासाचार्येण रचितस्य उपन्यासस्य किं नाम अस्ति? [1]

18) अधोलिखितेषू कस्यापि एकस्य छन्दस: लक्षणोदाहरणे लिखत– [3]

क) द्रुतविलम्बितम्

ख) स्त्रग्धरा

ग) शिखरिणी

19) निम्नलिखित–कस्यापि एकस्या: पंक्त्या: गणचिन्हं प्रदर्शयन् छन्दस: नामोल्लेखं कुरूत– [2]

क) दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषम्।

ख) मार्गं यत्र न विश्वकर्मतनय: कर्तुं नलोऽपि क्षम:।

20) अधोलिखितेषु कस्यापि एकस्य अलङ्कारस्य लक्षणोदाहरणे लिखत– [3]

क) अनुप्रास:

ख) रूपकम्

ग) उत्प्रेक्षा

21) निम्नलिखितेषु कस्यामपि एकस्यां पंक्त्यां प्रयुक्त–अलङ्कारस्य नामोल्लेखपूर्वकं लक्षणं लिखत – [2]

क) स्फुटपरागपरागतपङ्कजम्।

ख) हनूमानब्धिमतरद् दुष्करं किं महात्मना।

**22)** अधोलिखितं अपठितं गद्यांशं पठित्वा प्रश्नानाम् अत्तराणि लिखत

कश्चित् छात्रः गुरूं निकषा समागत्य शास्त्राणि अध्येतुम् उपक्रमम् अकरोत् । गुरूणा प्रथमं सन्ध्यावन्दनादिकं दैनन्दिनं कर्म पाठितम् । तन्मध्ये अवसरे समागते गुरूणा विविधानां शास्त्रग्रन्थानां परिचयः अपि कारितः । मासान्ते तेन शिष्येण ज्ञातं यत् पठितव्यानि शास्त्राणि बहूनि सन्ति ।

क) गुरूं निकषा क : समागच्छति? (एकपदेन उत्तरत) **[1]**

ख) गुरूणा प्रथमं किं पाठितम्? (पूर्णवाक्येन उत्तरत) **[1]**

ग) 'समया' इत्यस्य पदस्य गद्यांशात् पर्यायपदं लिखत । **[1]**

घ) 'पठितव्यानि शास्त्राणि' इत्यत्र विशेषणं–विशेष्यपदं किम्? **[1]**

**23)** अधोलिखितं अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

प्रातःकालसमयःसः । शाकफलादीनां क्रयणार्थम् अहं विपणिं गतवान् । हस्ते स्यूतौ । वस्त्रकोषे धनम् । विपण्यां विपुलः जनसम्मर्दः । कलकलनादः सर्वत्र श्रूयते । एकस्यां लघूत्पीठिकायाम् उपविष्टः अस्ति कश्चन विक्रेता । सच युवकः । तस्य पुरतः विशालः कण्डोलः । कण्डोले कदलीफलानां राशिः । पीतानि तानि गलितनि । अहं विक्रेतुः पुरतः अतिष्ठम् । विक्रेता सहजतया अहसत् । फलराशौ दृष्टिपातं कुर्वन् हसन् विक्रेता अवदत्–गृह्णन्तु गृह्णन्तु भवान् इति ।

क) धनं कुत्र वर्तते? (एकपदेन उत्तरम्) **[1]**

ख) विक्रेता कुत्र उपविष्टः अस्ति? (पूर्ण पदेन उत्तरम्) **[1]**

ग) ''तस्य पुरतः विशालः कण्डोलः'' इत्यत्र विशेष्यपदं लिखत । **[1]**

घ) 'सच युवकः' इत्यत्र 'स' इति सर्वनामस्थाने संज्ञापदं लिखत । **[1]**

**24)** प्रदत्त–शब्दानां प्रयोगं कुर्वन् एकम् अनुच्छेदं लिखत– **[5]**

महाकविः कालिदासः, संस्कृत साहित्ये, श्रेष्ठःकविः कनिष्ठकाधिष्ठित, सप्तकृतयः प्रसिद्धंनाटकं, उपमा–प्रयोगे, वैदर्भीरीतिः, महाकाव्यद्वयं, खण्डकाव्यद्वयम् ।

अथवा

क्रमरहितानि वाक्यानि समुचित क्रमानुसारं लिखत –

क) तथापि स: शान्त: एव आसीत् ।

ख) प्रजाजना: अपि तस्मिन् विशेषादरवन्त: आसन् ।

ग) निन्दक: पृष्टवान्–तेन किमर्थम् एतानि मह्यं प्रेषितानि ।

घ) पुरा कश्चन उदारचरित: राजा आसीत् ।

ङ) दूत: उक्तवान् – अस्माकं राजा भवत:कृते वस्तूनि प्रेषितवान् ।

च) स: महत्या प्रीत्या प्रजा: पालयति स्म ।

छ) एतत् राजा अपि जानाति स्म एव ।

ज) स सर्वदा राज्ञ: निन्दनं करोति स्म ।

झ) एकस्मिन् दिने तस्य निन्दकस्य गृहस्य पुरत: राज्ञ: दूत: उपस्थित: ।

ञ) तस्मिन् राज्ये कश्चन निन्दाशील: अपि आसीत् ।

25) निम्नलिखितेषु वाक्येषु केषाञ्चित् पञ्चवाक्यानां संस्कृतभाषायां अनुवादं कुरूत – [5]

क) मैं विद्यालय जाता हूँ ।

ख) मुझे दूध अच्छा लगता है ।

ग) राजा निर्धन को धन देता है ।

घ) पिता पुत्र के साथ गाँव जाता है ।

ङ) वह प्रतिदिन घर से विद्यालय जाती है ।

च) तुम दोनों आजकल कहाँ रहते हो ।

छ) अध्यापक शिष्य पर क्रोध करता है ।

ज) वह दौडते हुए घोड़े से गिर पडा ।

26) अधोलिखित-पदानां सूत्रोल्लेखपूर्वकं सन्धि-विच्छेदं कुरूत - [2]

क) नायक:

ख) परोपकार:

27) अधोलिखित-पदानां सूत्रोल्लेखपूर्वकं सन्धिं कुरूत- [2]

क) श्री + ईश:

ख) मृत + अण्ड:

28) निम्नलिखितेषु रेखाङ्कितपदेषु प्रयुक्त-विभक्ते: नामोल्लेखं कृत्वा तस्य सूत्रं चापि लिखत-

क) श्रीगणेशाय नम: । [1]

ख) दुर्जन: सज्जनाय ईर्ष्यति । [1]

ग) बालक: सिंहात् बिभेति [1]

घ) स: अध्ययनेन वसति । [1]

29) अधोलिखित-पदयो: प्रयुक्तसमासस्य नामोल्लेखपूर्वकं विग्रहं कुरूत- [2]

क) प्रतिदिनम्

ख) पाणिपादम्

30) अधोलिखित-विग्रहवाक्ययो: समासंकृत्वा समासस्य नामोल्लेखमपि कुरूत- [2]

क) चत्वारि मुखानि यस्य स:

ख) वज्रम् इव कठोरम् इति

DO NOT WRITE ANYTHING HERE